# ॥ શ્રીતારાધ્યાનમ્ ॥

.. shrItArAdhyAnam ..

sanskritdocuments.org

July 2, 2017

# .. shrItArAdhyAnam ..

# ॥ શ્રીતારાધ્યાનમ્ ॥

## Sanskrit Document Information

Text title : tArAdhyAnam

File name : tArAdhyAnam.itx

Category : dhyAnam

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 2, 2017

*sanskritdocuments.org*

# ॥ શ્રીતારાધ્યાનમ્ ॥

૧. વિશ્વવ્યાપકવારિમધ્યવિલસચ્છ્વેતામ્બુજન્મસ્થિતામ્ ।
કર્ત્રીખડ્ગકપાલનીલનલિનૈઃ રાજત્કરાં નીલભામ્ ॥

કાઞ્ચીકુણ્ડલહારકઙ્કણલસત્કેયૂરમઞ્જીરકામ્ ।
આપ્તૈર્નાગવરૈર્વિભૂષિતતનું ચારક્તનેત્રત્રયામ્ ॥

પિઙ્ગૈકાગ્રજટાં લસત્સુરસનાં દંષ્ટ્રાકરાલાનનામ્ ।
હસ્તૈશ્ચાપિ વરં કટૌ વિદધતીં શ્વેતાસ્થિપટ્ટાલિકામ્ ॥

અક્ષોભ્યેણ વિરાજમાનશિરસં સ્મેરાનનામ્ભોરુહામ્ ।
તારં શાવહૃદાસનાં દૃઢકુચામમ્બાં ત્રિલોક્યાં ભજે ॥

૨. શ્વેતામ્બરાં શારદચન્દ્રકાન્તિં સદ્ભૂષણાં ચન્દ્રકલાવતંસામ્ ।
કર્ત્રીકપાલાન્વિતપાદપદ્માં તારાં ત્રિનેત્રાં પ્રભજેઽખિલર્દ્ધ્યૈ ॥

૩. પ્રત્યાલીઢપદાર્પિતાઙ્ઘ્રિશવહૃદ્ઘોરાટ્ટહાસા પરા ।
ખડ્ગેન્દીવરકર્ત્રિખર્પરભુજા હુઙ્કારબીજોદ્ભવા ॥

ખર્વા નીલવિશાલપિઙ્ગલજટાજૂટૈકનાગૈર્યુતા ।
જાડ્યં ન્યસ્ય કપાલકે ત્રિજગતાં હન્ત્યુગ્રતારા સ્વયમ્ ॥

૪. સાત્ત્વિકમૂર્તિધ્યાનમ્ ॥

શ્વેતામ્બરાઢ્યાં હંસસ્થાં મુક્તાભરણભૂષિતામ્ ।
ચતુર્વક્ત્રામષ્ટભુજૈર્દધાનાં કુણ્ડિકામ્બુજે ॥

વરાભયે પાશશક્તી અક્ષસ્રક્પુષ્પમાલિકે ।
શબ્દપાથોનિધેર્મધ્યે તારાં સ્થિતિકરીં ભજે ॥

૫. રાજસમૂર્તિધ્યાનમ્ ॥

રક્તામ્બરાં રક્તસિંહાસનસ્થાં હેમભૂષિતામ્ ।
એકવક્ત્રાં વેદસઙ્ખ્યૈર્ભુજૈઃ સમ્બિભ્રતીં ક્રમાત્ ॥

અક્ષમાલાં પાનપાત્રમભયં વરમુત્તમમ્ ।
શ્વેતદ્વીપસ્થિતાં વન્દે તારાં સ્થિતિપરાયણામ્ ॥

૬. તામસમૂર્તિધ્યાનમ્ ॥

કૃષ્ણામ્બરાઢ્યાં નૌસંસ્થામસ્થ્યાભરણભૂષિતામ્ ।
નવવક્ત્રાં ભુજૈરષ્ટાદશભિર્દધતીં વરમ્ ॥

અભયં પરશું દર્વીં ખડ્ગં પાશુપતં હલમ્ ।
ભિન્દિં શૂલં ચ મુસલં કર્ત્રીં શક્તિં ત્રિશીર્ષકમ્ ॥

સંહારાસ્ત્રં વજ્રપાશૌ ખટ્વાઙ્ગં ગદયા સહ ।
રક્તામ્ભોધૌ સ્થિતાં વન્દે દેવીં સંહારકારિણીમ્ ॥

ઇતિ શ્રીતારાધ્યાનમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrItArAdhyAnam ..
was typeset using XƎLATEX 0.99996
on July 2, 2017

Please send corrections to *sanskrit@cheerful.com*